# Aparadhashtakam or Shivashtakam

# અપરાધાષ્ટકમ્ અથવા શિવાષ્ટકમ્

## Document Information

Text title : Aparadhashtakam 1 or Shivashtakam

File name : aparAdhAShTakam.itx

Category : shiva, aShTaka, shankarAcharya

Location : doc_shiva

Author : Shankaracharya

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor

Latest update : April 27, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 29, 2023

*sanskritdocuments.org*

# અપરાધાષ્ટકમ્ અથવા શિવાષ્ટકમ્

આશાવશાદષ્ટદિગન્તરાલે
  દેશાન્તરભ્રાન્તમશાન્તબુદ્ધિમ્ ।
આકારમાત્રાદવનીસુરં મા-
  મકુત્સકુત્સ્યં શિવ પાહિ શમ્ભો ॥ ૧॥ (મકૃત્યકૃત્યં)

માંસાસ્થિમજ્જામલમૂત્રપાત્ર-
  ગાત્રાભિમાનં ક્રિમિકૃસ્નજાલમ્ । (ગાત્રાભિમાનોત્સિતકૃત્યજાલમ્)
મદ્ભાવનં મન્મથપીડિતાઙ્ગં
  માયામયં માં શિવ પાહિ શમ્ભો ॥ ૨॥

સંસારમાયાજલધિપ્રવાહ-
  સમ્મગ્નમુદ્ભ્રાન્તમશાન્તચિત્તમ્ ।
ત્વત્પાદસેવાવિમુખં સકામં
  સુદુર્જનં માં શિવ પાહિ શમ્ભો ॥ ૩॥

ઇષ્ટાનૃતં ભ્રષ્ટમનિષ્ટધર્મ્મં
  નષ્ટાત્મબોધં નયલેશહીનમ્ ।
કષ્ટારિષડ્વર્ગ્ગનિપીડિતાઙ્ગં
  દુષ્ટોત્તમં માં શિવ પાહિ શમ્ભો ॥ ૪॥

વેદાગમાભ્યઃ સરસાનભિજ્ઞં
  પાદારવિન્દં તવ નાર્ચ્ચયન્તમ્ ।
વેદોક્તકર્મ્માણિ વિલોપયન્તં
  વેદાકૃતે માં શિવ પાહિ શમ્ભો ॥ ૫॥

અન્યાયવિત્તાર્જ્જન સક્તચિત્તં
  અન્યાસુ નારીષ્વનુરાગવન્તમ્ ।
અન્યાન્નભોક્તારમશુદ્ધદેહં
  આચારહીનં શિવ પાહિ શમ્ભો ॥ ૬॥

પુરાત્તતાપત્રયતપ્તદેહં
    પરાં ગતિં ગન્તુમુપાયવર્જ્યમ્ ।
પરાવમાનૈકપરાત્મભાવં
    નરાધમં માં શિવ પાહિ શમ્ભો ॥ ૭॥

પિતાઽથ સંરક્ષતુ પુત્રમીશો (પિતા યથા રક્ષતિ)
    જગત્પિતા ત્વં જગત્સહાયઃ । (જગતઃ સહાયમ્)
કૃતાપરાધં તવ સર્વકાર્યે
    કૃપાનિધે માં શિવ પાહિ શમ્ભો ॥ ૮॥

ઇતિ અપરાધાષ્ટકં અથવા શિવાષ્ટકં  સમ્પૂર્ણમ્ ।

અપરાધસ્તોત્રાષ્ટકમ્

The authorship of the aShTakam is not clear.
Some online presenters attribute it to
Sri Vriddha Nrisimha Bharati VIII 1798-1879),
the then Shankaracharya of Sringeri Matt.
The catalogue of Sanskrit manuscripts (linked)
just mention AchAryasvAmin or Shankaracharya.

Encoded and proofread by Mohan Chettoor

*Aparadhashtakam or Shivashtakam*
pdf was typeset on April 29, 2023

Please send corrections to *sanskrit@cheerful.com*